# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

### अध्याय ५३

कामधेनुं वसिष्ठोऽपि यदा न त्यजते मुनिः ।
तदास्य शबलां राम विश्वामित्रोऽन्वकर्षत ॥ १॥

नीयमाना तु शबला राम राज्ञा महात्मना ।
दुःखिता चिन्तयामास रुदन्ती शोककर्शिता ॥ २॥

परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ।
याहं राजभृतैर्दीना ह्रियेयं भृशदुःखिता ॥ ३॥

किं मयापकृतं तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं भक्तामिष्टां त्यजति धार्मिकः ॥ ४॥

इति सा चिन्तयित्वा तु निःश्वस्य च पुनः पुनः ।
जगाम वेगेन तदा वसिष्ठं परमौजसं ॥ ५॥

निर्धूय तांस्तदा भृत्याञ्शतशः शत्रुसूदन ।
जगामानिलवेगेन पादमूलं महात्मनः ॥ ६॥

शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् ।
वसिष्ठस्याग्रतः स्थित्वा मेघदुन्दुभिराविणी ॥ ७॥

भगवन्किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ।
यस्माद्राजभृता मां हि नयन्ते त्वत्सकाशतः ॥ ८॥

एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ।
शोकसन्तप्तहृदयां स्वसारमिव दुःखिताम् ॥ ९॥

न त्वां त्यजामि शबले नापि मेऽपकृतं त्वया ।
एष त्वां नयते राजा बलान्मत्तो महाबलः ॥ १०॥

न हि तुल्यं बलं मह्यं राजा त्वद्य विशेषतः ।
बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११॥

इयमक्षौहिणीपूर्णा सवाजिरथसङ्कुला ।
हस्तिध्वजसमाकीर्णा तेनासौ बलवत्तरः ॥ १२॥

एवमुक्ता वसिष्ठेन प्रत्युवाच विनीतवत् ।
वचनं वचनज्ञा सा ब्रह्मर्षिममितप्रभम् ॥ १३॥

न बलं क्षत्रियस्याहुर्ब्राह्मणो बलवत्तरः ।
ब्रह्मन्ब्रह्मबलं दिव्यं क्षत्रात्तु बलवत्तरम् ॥ १४॥

अप्रमेयबलं तुभ्यं न त्वया बलवत्तरः ।
विश्वामित्रो महावीर्यस्तेजस्तव दुरासदम् ॥ १५॥

नियुङ्क्ष्व मां महातेजस्त्वद्ब्रह्मबलसम्भृताम् ।
तस्य दर्पं बलं यत्तन्नाशयामि दुरात्मनः ॥ १६॥

इत्युक्तस्तु तया राम वसिष्ठः सुमहायशाः ।
सृजस्वेति तदोवाच बलं परबलारुजम् ॥ १७॥

तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप ।
नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः ॥ १८॥

स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः ।
पह्लवान्नाशयामास शस्त्रैरुच्चावचैरपि ॥ १९॥

विश्वामित्रार्दितान्दृष्ट्वा पह्लवाञ्शतशस्तदा ।
भूय एवासृजद्घोराञ्शकान्यवनमिश्रितान् ॥ २०॥

तैरासीत्संवृता भूमिः शकैर्यवनमिश्रितैः ।
प्रभावद्भिर्महावीर्यैर्हेमकिञ्जल्कसंनिभैः ॥ २१॥

दीर्घासिपट्टिशधरैर्हेमवर्णाम्बरावृतैः ।
निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ॥ २२॥

ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह ॥ २३॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com